ॐ अस्य सप्तशतिका षष्टचरित्रस्य श्रीशंकर
ऋषिः महालक्ष्मीदेवता अनुष्टुप्छंदः धूम्र-
लोचनहते ईशान्य षष्टचरित्रजपे विनियोगः
अथध्यानं घंटाशूलहलानि शंखमुसुले चक्रं
धनुःसायकं हस्ताब्जैर्दधतीं घनांचविलसच्छी
तांशुतुल्यप्रभां गौरीदेहसमुद्भवां त्रिजगता
माधारभूतांमहा पूर्वामत्रसरस्वतीमनुभजे

शुंभादिदैत्यार्दिनीं १ ॐऐंश्रींनमः ऋषिरुवा
च १ ॐऐंॐनमः इत्याकर्ण्यवचोदेव्याः स
दूतोमर्षपूरितः समाचष्टसमागम्य दैत्यरा
जायविस्तरात् २ ॐऐंहूंनमः तस्यदूतस्यत
द्वाक्य माकर्ण्यासुरराट्ततः सक्रोधः प्राहदै
त्यानामधिपंधूम्रलोचनं ३ ॐऐंक्लौंनमः हेधू-
धूम्रलोचनाशुत्वं स्वसैन्यपरिवारितः तामा

६ नयवलाद्दुष्टां केशाकर्षणविह्वलां ४ ॐ ऐं क्रौं
चं नमः तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठते परः स
२ हंतव्योमरोवापि यक्षोगंधर्वएववा ५ ॐ ऐं प्रां
2 नमः ऋषिरुवाच ६ ॐ ऐं चीं नमः तेनाज्ञप्तस्त
तः शीघ्रं स दैत्योधूम्रलोचनः वृतः षष्ट्यासहस्रा-
णा मसुराणांद्रुतंययौ ७ ॐ ऐं क्लीं नमः स दृष्ट्वा
तांततोदेवीं तुहिनाचलसंस्थितां जगादोच्चैः

प्रयाहीति मूलंशुंभनिशुंभयोः ८ ॐऐंप्रैंनमः न
चेत्प्रीत्याद्यभवती मद्भर्तारमुपैष्यति ततोवलान्न
याम्येष केषाकर्षणविह्वलां ९ ॐऐंक्रींनमः देव्यु
वाच ॐऐंज्रौंनमः दैत्येश्वरेणप्रहितो वलवान्व-
लसंवृतः वलान्नयसिमामेवं ततःकिंतेकरोम्यहं ११
ॐऐंश्रौंनमः ऋषिरुवाच १२ ॐऐंघंनमःइत्यु
क्तःसोभ्यधावत्ता मसुरोधूम्रलोचनः हुंकारेणै

६ चं २ 3

वर्तमस्य साचकारांविकाततः १३ ॐऐंॐंन
मः प्रथयुद्धंमहासैन्य मसुराणांतथांविका
ववर्षसायकैस्तीक्ष्णै स्तथाशक्तिपरश्वधैः १४
ॐऐंश्रींनमः ततोधुतसटः कोपा त्कृत्वाना
दंसुभैरवं पपातासुरसेनायां सिंहोदेव्याःस्व
वाहनाः १५ ॐऐंक्रींनमः कांश्चित्करप्रहारेण
दैत्यानास्येनचापरान् आक्रांत्याचाधरेणा

न्या न्सजघान महासुरान् ८६ ॐ ऐं हं नमः
केशांचित्पाटयामास नखैः कोष्ठानि केस
री तथा तलप्रहारेण शिरांसि कृतवान्पृथ
क् ८७ ॐ ऐं छ्रां नमः विच्छिन्नबाहुशिरसः
कृतास्तेन तथापरे पपौ च रुधिरं कोष्ठा दन्ये
षां धुतकेसरः ८८ ॐ ऐं द्म्लीं नमनमः क्षणे
न तद्बलं सर्वं क्षयं नीतं महात्मना तेन केस

६ चं· ४

रिणादेव्या वाहनेनातिकोपिना १९ ॐ ऐं ह्लूं नमः
श्रुत्वातमसुरं देव्या निहतं धूम्रलोचनं बलंचक्ष
यितंकृत्स्नं देवीकेसरिणाततः २० ॐ ऐं सौं नमः
चुकोपदैत्याधिपतिः शुंभः प्रस्फुरिताधरः आ
ज्ञापयामासचतौ चंडमुंडौमहासुरौ २१ ॐ ऐं ह्सौं
नमः हेचंड हेमुंड बलैर्बहुभिः परिवारितौ त
त्रगच्छतगत्वाच सासमानीयतांलघु २२ ॐ

ऐंक्लूंनमः केशेष्वाकृष्यबद्धावा यदिवःसंश
योयुधि तदासेषायुधैःसर्वैः रसुरैर्विनिहन्यतां २२
ॐऐंसौंनमः तस्यांहतायांदुष्टायां सिंहेचवि
निपातिते शीघ्रमागम्यत्वांवद्धा गृहीत्वाता
मथांविकां २४ इतिमार्कंडेयपुराणेसाव
र्णिकेमन्वंतरे देवीमाहात्म्येधूम्रलोचनवधोना
मषष्ठोध्यायः ६ ॥ ॐसांगायैशतान्देयैधू-

६ मात्र्यै महाहुतिं समर्पयामि नमः स्वाहा ॥
चं· उवाच ४ श्लोक २· एवं २४ एवमादितः
५ ४१२ ॥

७ चं १

ॐ अस्य चंडीकालीसप्तमचरितस्य सप्तशतिका मंत्रस्य महाचंडी सरस्वती भैरवो ऋषिः महाकाली चामुंडा महासरस्वती देवता त्रिष्टुप्छंदः भीमा बीजं भ्रामरीशक्तिः भ्रांभैरवीकीलकं सूर्यस्तत्त्वं सामवेदमूर्त्तिमयी महावालास्थां श्यामांगीप्रीत्यर्थे सप्तमचरितजपेविनियोगः अथध्यानं ॐ ध्यायेहं रत्नपीठेशुककलपठितं श्रृण्वंतीं

श्यामलांगीं न्यस्तैकांघ्रिंसरोजे शशिशकलध
रां वल्लकींवादयंतीं कल्हाराबद्धमालानियमि
तविलसच्चूलिकांरक्तवस्त्रां मांतगींशंखपात्रंम
धुमदविवशां चित्रकोद्भासिमालां १ ॐऐंश्रींन
मः ऋषिरुवाच १ ॐऐंक्रंनमः श्रात्तप्नास्तेत
तोदैत्याश्चंडमुंडपुरोगमाः चतुरंगवलोपेता-
ययुरभ्युद्यतायुधाः २ ॐऐंक्लींनमः ददृशुस्ते

७ ततोदेवी मीषद्धासांव्यवस्थितां सिंहस्योपरि शै
चं· लेंद्र शृंगेमहतिकांचने २ ॐ ऐं ङ्कं नमः तेदृष्ट्वा
२ तांसमादातुमुद्यमंचक्रुरुद्यताः आकृष्टचापासि
2 धरा स्तथान्येतत्समीपगाः ४ ॐ ऐं स्रूं नमः ततःको
पंचकारोच्चै रंबिकातानरीन्प्रति कोपेनचास्या
वदनं मसीवर्णमभूत्तदा ५ ॐ त्रौं नमः भ्रुकुटी
कुटिलात्तस्या ललाटफलकाद्द्रुतं कालीकरालव

दना विनिष्क्रांतासिपाशिनी ६ ॐ ऐं ह्रौं नमः
विचित्रखट्वांगधरा नरमालाविभूषणा द्वीपिच
र्मपरीधाना शुष्कमांसातिभैरवा ७ ॐ ऐं ऊं नमः
अतिविस्तारवदना जिह्वाललनभीषणा निमग्ना
रक्तनयनानादापूरितदिङ्मुखा ८ ॐ ऐं ह्लूं नमः ।
सावेगेनाभिपतिता घातयंतीमहासुरान् सै
न्येतत्रसुरारीणामभक्षयततद्बलं ९ ॐ ऐं ह्लौं

७ चं· २ 3 नमः पार्ष्णिग्राहांकुशग्राहि योधघंटासमन्वि-
तान् समादायैकहस्तेन मुखेचिक्षेपवारणात्
१० ॐ ऐं क्रैं नमः तथैवयोधंतुरगै रथंसारथिना
सह निक्षिप्यवक्त्रेदशनैश्चर्वयत्यतिभैरवं ११ ॐ
ऐं तं नमः एकंजग्राहकेशेषु ग्रीवायामथचापरं
पादेनाक्रम्यचैवान्य मुरसान्यमपोथयत् १२ ॐ
ऐं ल्लूं नमः तैर्मुक्तानिचशस्त्राणि महास्त्राणित-

ध्यासुरैः मुखेनजयाहरुषा दशनैर्मथितान्यपि ।३
ॐ ऐं ह्लीं नमः वलिनांतद्बलंसर्वं मसुराणांदुरा
त्मनां ममर्दाभक्षयच्चान्या नन्यांश्चाताडयत्त
दा ।४ ॐ ऐं ह्सूं नमः असिनानिहताः केचित्केचि
त्खट्वांगताडिताः जग्मुर्विनाशमसुरा दंताग्राभि
हतास्तथा ।५ ॐ ऐं शां नमः क्षणेनतद्बलंसर्वंम
सुराणांनिपातितं दृष्ट्वाचंडोभिदुद्राव तांकालीम

७ तिभीषणां ६ ॐ ऐं स्लूं नमः शरवर्षैर्महाभीमै
चं॰ र्भीमाक्षीं तां महासुरः छादयामास चक्रैश्च मुंड
४ क्षिप्तैः सहस्रशः ७ ॐ ऐं स्लीं नमः तानि चक्राण्यने
५ कानि विशमानानि तन्मुखं बभुर्यथार्कबिंबा
नि सुबहूनि घनोदरं ८ ॐ ऐं श्रैं नमः ततोजहा
सातिरुषाभीमं भैरवनादिनी कालीकरालवक्त्रां
त र्दुर्दर्शदशनोज्ज्वला ९ ॐ ऐं श्रं नमः उत्थाय्य-

चमहासिंहं देवीचंडमथावत गृहीत्वाचास्यकेशे
ध्वशिरस्तेनासिनाछिनत् २ ॐऐंऔंनमः प्रथमुं
डोम्यधावत्तां दृष्ट्वाचंडंनिपातितं तमप्यपातय
द्भूमौ साखड्गाभिहतंरुषा २१ ॐऐंह्लींनमः ह
तशेषंततःसैन्यं दृष्ट्वाचंडंनिपातितं मुंडंचसुम
हीवीर्यं दिशोभेजेभयातुरं २२ ॐऐंश्रांनमः शि
रश्चंडस्यकालीच गृहीत्वामुंडमेवच प्राहप्रचंडा

७
चं
५
८

ट्टहास मिष्ठमभ्येत्यचंडिकां २३ ॐ ऐं सौं नमः
मयातवात्रोपहृतौ चंडमुंडौमहापशू युद्धय
ज्ञेस्वयंशुंभं निशुंभंचहनिष्यसि २४ ॐ ऐं श्रीं
नमः ऋषिरुवाच २५ ॐ ऐं ष्रीं नमः तावानी
तौनततोदृष्ट्वा चंडमुंडौमहासुरौ उवाचकालींक
ल्याणी ललितंचंडिकावचः २६ ॐ ऐं ह्स्रीं नमः
यस्माच्चंडंचमुंडंच गृहीत्वात्वमुपागता चामुंडे

तितनोलोके ख्यातादेवीभविष्यसि २७ इतिमा
र्कंडेयपुराणे सावर्णिकेमन्वंतरे देवीमाहात्म्ये
चंडमुंडवधोनामसप्तमोध्यायः ७ ॥ॐसां
गायैकर्पूरवीजाधिष्ठात्र्यै कालीचामुंडादेव्यैम
हाहुतिंसमर्पयामिनमः स्वाहा उवाच २
स्लोक २५ एवं २७ एवमादितः ४२४ ॥ः॥

८ ॐ अस्य सप्तशतिका महामंत्रस्य अष्टमपूर्वच
चं. रितस्य श्रीगौरांगीवाला आदिनाथऋषिः त्रि
१ ष्टुप्छंदः महाकाली चक्रेश्वरी महापद्मा दे-
वता क्रांबीजं ह्रींशक्तिः श्रींकीलकं वालास्त
त्वं हाटकमूर्तिमयी अजपाअघोरमंत्रस्य ॐ
क्लींक्लौंक्लींक्लींऊंऊंह्रींह्रीं दक्षिणकालिके घो
ररूपे घोरदंष्ट्रो रुधिरप्रिये रुधिरपूर्णवक्त्रे-

रुधिरघृतस्तनि ममशत्रून्खादय २ हिंस २ मार

य २ भिंदि २ छिंदि २ उच्चाटय २ द्रावय २ शोष

य २ क्रींक्रींह्रूंह्रूंक्रौंक्रौंस्वाहा ॐक्रींकालिकायै

ममशत्रून्भत्त्यार्थेत्वां समर्पयामिस्वाहा म

हाकाली महापद्मावती महाचामुंडाप्रीत्य

र्थेअष्टमचरित सप्तशतिकापाठेविनियोगः

अथध्यानम् ॐनागाधीश्वर विष्टरांफणि-

८ फणा तंसोरुरत्नावली भास्वद्देहलतांविभाक
चं॰ रनिभां नेत्रत्रयोद्भासितां मालाकुंभकपाल
२ नीरजकरां चंद्रार्धमौलिंपरां सर्वज्ञेश्वरभैरवां
कनिलयां पद्मावतींचिंतये । ॐ ऐं श्रौं नमः
ऋषिरुवाच । ॐ ऐं स्त्रीं नमः चंडेचनिहतेदै
त्ये मुंडेचविनिपातिते बहुलेषुचसैन्येषु-
क्षयितेष्वसुरेश्वरः २ ॐ ऐं प्रें नमः ततःकोप

पराधीन चेताःशुंभःप्रतापवान् उद्योगंसर्व
सैन्यानां दैत्यानामादिदेशाह २ ऊंऐंऐंनमः।
मुद्यसर्वबलैर्दैत्याः षडशीतिरुदायुधाः कं
बूनांचतुराशीति निर्यांतुस्वबलैर्वृतः ४ ऊं
ऐंक्रौंनमः कोटिवीर्याणिपंचाश दसुराणांकु
लानिवै शतंकुलानिधूम्राणां निर्गच्छंतुम
माज्ञया ५ ऊंऐंईनमः कालकादौर्हृदामौ-

ष
चं
२
3

र्य्याः कालिकेयास्तथासुराः युद्धायसज्जानि
र्य्यांतु आज्ञयात्वरितामम ६ ॐइंनमः इत्या
ज्ञाप्यासुरपतिः शुंभोभैरवशासनः निर्जगाम
महासैन्य सहस्रैर्वह्भिर्वृतः ७ ॐहेंक्रूंन
मः आयांतंचंडिकादृष्ट्वा तत्सैन्यमतिभीषणं
ज्यास्वनैःपूरयामास धरणीगगनांतरं ८ ॐ
ऐंश्रींनमः ततःसिंहोमहानादमतीवकृत

न्नृप घंटास्वनेनतंनाद मंविकोचोपवृंहयत् ९
ॐऐंम्लूंनमः धनुर्ज्यासिंहघंटानां नादापूरित
दिङ्मुखा निनादैर्भीषणैःकाली जिग्येविस्तारि
तानना ९ ॐऐंत्रोंनमः तंनिनादमुपश्रुत्य दै
त्यसैन्यैश्चतुर्दिशं देवीसिंहस्तथाकाली सरो-
षैःपरिवारिताः ९ ॐऐंङ्गंनमः एतस्मिन्नंतरे
भूप विनाशायसुरद्विषां भवायामरसिंहाना

ए मतिवीर्यबलान्विताः १२ ॐ ऐं ग्लौं नमः ब्रह्मेश
चं गुहाविष्णूनां यथेंद्रस्य च शक्तयः शरीरेभ्यो वि
४ निष्क्रम्य तद्रूपैश्चंडिकां ययुः १३ ॐ ऐं ङ्कं नमः
५ यस्यदेवस्ययद्रूपं यथाभूषणवाहनं तद्वदे
वहितच्छक्ति रसुरान्योद्धुमाययौ १४ ॐ ऐं क्लौं
नमः हंसयुक्तविमानाग्रे साक्षसूत्रकमंडलुः
आयाताब्रह्मणःशक्तिर्ब्रह्माणीसाभिधीयते १५

ॐ ऐं स्रौं नमः माहेश्वरी वृषारूढा त्रिशूलवरधा

रिणी महाहिवलयाप्राप्ता चंद्ररेखाविभूषणा ६

ॐ ऐं ध्रौं नमः कौमारी शक्तिहस्ता च मयूरवरवाह

ना योद्धुमभ्यायर्यौं दैत्या नंविका गुहरूपिणी

७ ॐ ऐं स्रौं नमः तथैव वैष्णवी शक्तिर्गरुडोपरि

संस्थिता शंखचक्रगदाशार्ङ्ग खड्गहस्ताभ्युपा

ययौ ८ ॐ ऐं स्थ्रीं नमः यज्ञवाराहमतुलं रू

८ पंयाविभ्रतोहरेः शक्तिःसाप्यायमौतत्र वारा
चं· हींविभ्रतीतन्तु १९ ॐऐंहौंनमः नारसिंहीनृसिं
५ हस्य विभ्रतीसदृशंवपुः क्षिप्तातत्रसटाक्षेपक्षिप्त
नक्षत्रसंहतिः २० ॐऐंरंनमः वज्रहस्तातथैवैंद्री
गजराजोपरिस्थिता प्राप्तासहस्रनयना यथा
शक्रस्तथैवसा २१ ॐऐंसंनमः ततःपरिवृतस्ता
भिरीशानोदेवशक्तिभिः हन्यंतामसुराःशीघ्रं

ममप्रीत्याहचंडिकां २२ ॐऐंह्म्ल्रींनमः ततोदेवी
शरीरात्तु विनिष्क्रांतातिभीषणा चंडिकाशक्तिरत्यु
ग्रा शिवाशतनिनादिनी २३ ॐक्ष्रौंनमः सचाहधू
म्रजटिलमीशानमपराजिता दूतत्वंगच्छभगवन्पा
र्श्वंशुंभनिशुंभयोः २४ ॐऐंवींनमः ब्रूहिशुंभंनि
शुंभंच दानवावतिगर्वितौ येचान्येदानवास्तत्र
युद्धायसमुपस्थिताः २५ ॐऐंल्हूंनमः त्रैलोक्य

ष
पं
६
6

मिंद्रोत्तमतां देवाः संतुहविर्भुजः यूयंप्रयातपा
तालं यदिजीवितुमिच्छथ २६ ॐ हें ह्सीं नमः व
लावलेपादथचे द्भवंतोयुद्धकांक्षिणः तदाग
च्छतत्त्वप्यंतु मच्छिवापिशितेनमः २७ ॐ हें
ह्सीं नमः यतोनियुक्तोदौत्येन तयादेव्याशि
वः स्वयं शिवदूतीतिलोकेस्मिं स्ततः साख्या
तिमागताः २८ ॐ हें ह्सीं नमः तेपिश्रुत्वाव

चोदेव्याः शार्वीख्यातं महासुराः अमर्षापूरिता
जग्मुर्यतः कात्यायनीस्थिता २९ ओं ऐं सौं न
मः ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः
ववर्षुरुद्धतामर्षा स्तां देवीममरारयः ३० ओं
ऐं ब्लूं नमः साच तत्प्रहितान्बाणाञ्छूलशक्तिप
रश्वधान् चिच्छेदलीलयाध्मात धनुर्मुक्तैर्महे
षुभिः ३१ ओं ऐं ह्म्लीं नमः तस्याग्रतस्तथाका

ली शूलपातविदारितान् खट्वांगपोथितांश्चारी

न्कुर्वंतीव्यचरत्तदा २२ ॐऐंश्रूंनमः कमंडलुज

लाक्षेप हतवीर्यान्हतौजसः ब्रह्माणीचाकरोच्छ्रू

न्येनयेनस्मधावति २३ ॐऐंक्षींनमः माहेश्वरीत्रि

शूलेन तथाचक्रेणवैष्णवी दैत्याञ्जघानकौमारी

तथाशक्त्यातिकोपना २४ ॐऐंश्रींनमः ऐंद्रीकुलि

शपातेन शतशोदैत्यदानवाः पेतुर्विदारिताःपृथ्व्यां

रुधिरौघप्रवर्षिणः २५ ॐ ऐं क्लीं नमः तुंडप्रहारवि

ध्वस्ता दंष्ट्राग्रक्षतवक्षसः वाराहमूर्त्यान्यपतं-

श्चक्रेणचविदारिताः २६ ॐ ऐं क्लीं नमः नखैर्विदा

रितांश्चान्यान्भक्षयंतीमहासुरान् नारसिंहीच

चाराजौ नादापूर्णदिगंबरा २७ ॐ ऐं फ्रें नमः-

चंडाट्टहासैरसुराः शिवदूत्याभिदूषिताः पेतुः पृ

थिव्यांपतितां स्तांश्चखादाथसातदा २८ ॐ ऐं

८
चं
८
6

ह्रूंनमः इतिमातृगणांक्रुद्धं मर्दयंतंमहासुरान्
दृष्ट्वाभ्युपायैर्विविधै र्नेशुर्देवारिसैनिकाः ३९ ॐ
ऐंह्लूंनमः पलायनपरान्दृष्ट्वा दैत्यान्मातृगणा
र्दितान् योद्धुमभ्याययौक्रुद्धो रक्तबीजोमहासु
रः ४० ॐऐंस्मांनमः रक्तबिंदुर्यदाभूमौ पतत्य
स्यशरीरतः समुत्पततिमेदिन्या स्तत्प्रमाणस्त
दासुरः ४१ ॐऐंम्लूंनमः युयुधेसगदापाणि-

रिंद्रशाक्त्यामहासुरः ततश्चैंद्रीस्ववज्रेण रक्त-
वीजमताडयत् ४२ ॐ ऐं हं नमः कुलिशेनाह
तस्यासु वज्रस्सुस्रावशोणितं समुत्तस्थुस्त
तोयोधा स्तद्रूपास्तत्पराक्रमाः ४३ ॐ ऐं स्लूं न
मः यावंतःपतितास्तस्य शरीराद्रक्तविंदवः
तावंतःपुरुषाजाता स्तद्वीर्यवलविक्रमाः ४४
ॐ ऐं ॐ नमः तेचापियुयुधुस्तत्र पुरुषारक्तसं

प चं ८ १

भवाः समंमात्राभिरत्युग्रं शस्त्रपातातिभीषणं
४५ ॐ ऐं ह्रौं नमः पुनश्च वज्रपातेन हतमस्य
शिरोयदा ववाहरक्तं पुरुषा स्ततोजाताः सह
स्रशः ४६ ॐ ऐं ल्वीं नमः वैष्णवी समरे चैनं च
क्रेणाभिजघ्नानह गदयाताडयामास ऐंद्री
तमसुरेश्वरं ४७ ॐ ऐं यां नमः वैष्णवीचक्राभि
न्नस्य रुधिरस्रावसंभवैः सहस्रशोजगद्व्या

त्रं ततस्तमाग्रेर्महासुरैः ४८ ॐऐंह्रींक्लींनमः श
क्त्याजघानकौमारी वाराहीचतथासिना माहे
श्वरीत्रिशूलेन रक्तवीजंमहासुरं ४९ ॐऐंह्रीं
नमः सचापिगदयादैत्यः सर्वाएवाहनत्पृथ
क् मातृकोपसमाविष्टो रक्तवीजोमहासुरः ५०
ॐऐंह्लौंनमः तस्याहतस्यबहुधा शक्तिशूला
दिभिर्भुवि पपातयोवैरक्तौ घ स्तेनासञ्छत-

८ शोसुराः ५१ ॐ ऐं ह्रीं नमः तैश्चासुरासृक्संभूतै
चं रसुरैः सकलं जगत् व्याप्तमासीत्ततोदेवा भ
१ यमाजग्मुरुत्तमं ५२ ॐ ऐं षां नमः तान्विषण्णा
10 न्सुरान्दृष्ट्वा चंडिकाप्राह सत्वरा उवाच कालीं
चामुंडे विस्तरं वदनं कुरु ५३ ॐ ऐं त्रीं नमः
मच्छस्त्रपातसंभूतान् रक्तविंदून्महासुरान् र
क्तविंदोः प्रतीच्छत्वं वक्त्रेणानेनवेगिना ५४

ॐऐंक्लींनमः भक्षयंतीचररणे तदुत्पन्नान्म

हासुरान् एवमेषक्षयंदैत्यः क्षीणरक्तोगमिष्य

ति ५५ ॐऐंस्क्लूंनमः भक्ष्यमाणास्त्वयाचोग्रा

नचोत्पत्स्यंतिचापरे इत्युक्त्वातांततोदेवीशूले

नाभिजघानतं ५६ ॐऐंक्रींनमः मुखेनका-

लीजगृहे रक्तवीजस्यशोणितं ततोसावाजघा

नाथ गदयातत्रचंडिकां ५७ ॐऐंह्रूंनमः ॥

८ चं ॥

नचास्यावेदनांचक्रे गदापातोल्पिकामपि न
स्याहतस्यदेहात्तु वह्नुस्त्रावशोणितं ५८
ॐ ऐं ह्रैं नमः यतस्ततस्तद्वक्त्रेण चामुंडास
म्प्रतीच्छति मुखेसमुद्गतायेस्या रक्तपातान्
महासुराः ५९ ॐ ऐं क्लीं नमः तांश्चखादाथचा
मुंडा पपौतस्यचशोणितं देवीशूलेनवज्रेण
बाणैरसिभिऋष्टिभिः ६० ॐ ऐं सौं नमः जघा

नरक्तवीजंतं चामुंडापीतशोणितं सपपात
महीपृष्टे शास्त्रसंघसमाहतः ६१ ऊँ ह्रें ह्रीं न
मः नीरक्तश्चमहीपाल रक्तवीजोमहासुरः
ततस्तेहर्षमतुल मवापुस्त्रिदशान्वय ६२ ऊँ
ह्रें ऊँ नमः तेषांमातृगणोजातो ननर्तीसृ-
ङ्मदोद्धतः ६२ इतिमार्कंडेयपुराणे साव
र्णिकेमन्वंतरेदेवीमाहात्म्येरक्तवीजवधोना

८ चं. १२ 12

स॰प्रष्टमोध्यायः ॥ ओंसांगायै अष्टमातृका
सहितायै रक्ताद्यै महाहुतिं समर्पयामि नमः
स्वाहा ॥ उवाच १ अर्ध १ श्लोक ६१ एवं ६२
एवमादितः ५.२॥

९ चं० १

ॐ अस्य सप्तशतिका महामंत्रस्य नवमउन्न
रचीत्रस्य श्रीगौरांगीवाला आदिनाथऋषिः
त्रिष्टुप्छंदः महाकाली चक्रेश्वरी महापद्मावतीदे
वता क्रांबीजं क्रींशक्तिः श्रींकीलकं वालास्त
त्वं हाटकमूर्तिमयी अजपाअघोर मंत्रस्य ॐ
क्रौंक्रौं कींङ्कुंङ्कुं क्रींक्रीं दक्षिणेकालिके दंष्ट्रेघोररू
पेघोररुधिराप्रिये रुधिरपूर्णवक्त्रे रुधिरेवृतस्तनि

ममशत्रून्खादय हिंस २ मारय २ भिंदि २ छिंदि२
उच्चाटय २ द्रावय २ शोषय २ क्रींक्रींह्रूंह्रूंह्रौंह्रौं
स्वाहा ॐह्रींकालिकायै ममशत्रून्भक्ष्यार्थंत्वां
समर्पयामिस्वाहा महाकाली महापद्मावति
महाचामुंडाप्रीत्यर्थे नवमचरित्रसप्तशतिका
पाठेविनियोगः अथध्यानं ॐवंधूककांचन
निभांरुचिराक्षमालां पाशांकुशौचवरदांनिज

९ चं० २

२

वाङ्दंडैः विभ्राणमिंदुशकलाभरणांत्रिनेत्रा
मर्धांविकेशमनिशंवपुराश्रयामि ॐऐंह्रींनमः
राजोवाच १ ॐऐंक्लींनमः विचित्रमिदमाख्या
तं भगवन्भवतामम देव्याश्चरितमाहात्म्यं
रक्तबीजवधाश्रितं २ ॐऐंक्लौंनमः भूयश्चे-
च्छाम्यहंश्रोतुं रक्तबीजेनिपातिते चकारशुंभो
यत्कर्म निशुंभश्चातिकोपनः ३ ॐऐंश्रौंनमः

ऋषिरुवाच ४ ॐ ऐं स्लौं नमः चकारकोपमतु
लं रक्तबीजेनिपातिते शुंभासुरोनिशुंभश्च ह
तेष्वन्येषुवाहवे ५ ॐ ऐं क्रौं नमः हन्यमानंमहा
सैन्यं विलोक्यामर्षमुद्वहन् अभ्यधावन्निशुंभो
ऽथ मुख्ययासुरसेनया ६ ॐ ऐं ह्सौं नमः तस्या
ग्रतस्तथापृष्ठे पार्श्वयोश्चमहासुराः संदष्टौष्ठ
पुटाःक्रुद्धाहंतुंदेवीमुपाययुः ७ ॐ ऐं इं नमः ॥

९ चं॰ २ 3

प्राजगाममहावीर्यः शुंभोपिस्वबलैर्वृतः नि
हंतुंचंडिकांकोपात्कृत्वायुद्धंतुमातृभिः ८ ॐ
ऐंवूंनमः ततोयुद्धमतीवासी द्देव्याःशुंभनिशुं
भयोः शरवर्षमतीवोग्रं मेघयोरिववर्षतोः ९
ॐऐंश्रांनमः चिच्छेदास्ताञ्छरांस्ताभ्यां चंडिका
स्वशरोत्करैः ताडयामासचांगेषु शस्त्रौघैरसुरे
श्वरौ १० ॐऐंल्लूंनमः निशुंभोनिशितंखड्गं चर्म

चादायसुप्रभं अताडयन्मूर्ध्निसिंहं देव्यावाह
नमुत्तमं ११ ॐ ऐं श्रां नमः ताडितेवाहनेदेवी
क्षुरप्रेणासिमुत्तमं निशुंभस्याशुचिच्छेद च
र्मचाप्यष्टचंद्रकं १२ ॐ ऐं श्रीं नमः छिन्नेचर्म
णिखड्गेच शक्तिंचिक्षेपसोऽसुरः तामप्यस्यद्वि
धाचक्रे चक्रेणाभिमुखागतां १२ ॐ ऐं क्रौं नमः
कोपाध्मातोनिशुंभोऽथ शूलंजग्राहदानवः ।

९ आयांतंमुष्टिपातेन देवीतच्चाप्यचूर्णयत् १४
चं· ॐऐंह्रींनमः आविध्याथगदांसोपि चिक्षेपचंडिकां
४ प्रति सापिदेव्यात्रिशूलेन भिन्नाभस्मत्वमागता
५ १५ ॐऐंक्लींनमः ततःपरशुहस्तंत मायांतंदैत्य
पुंगवं आहत्यदेवीबाणौघैरपातयतभूतले १६
ॐऐंह्रींनमः तस्मिन्निपतितेभूमौ निशुंभेभीमवि-
क्रमे भ्रातर्यतीवसंक्रुद्धः प्रययौहंतुमंबिकां १७

ॐऐंक्रौंनमः सरथस्थस्तथात्युच्चैर्गृहीतपरमा
युधैः भुजैरष्टाभिरतुलै र्व्याप्याशेषंबभौनमः ९
ॐऐंक्लींनमः तमायांतंसमालोक्य देवीशंखमवा
दयत् ज्याशब्दंचापिधनुष श्चकारातीवदुःसहं १९
ॐऐंम्लींनमः पूरयामासककुंभो निजघंटास्वने
नच समस्तदैत्यसैन्यानां तेजोवधविधायिका
ना २ ॐऐंस्लौंनमः ततःसिंहोमहानादै स्त्याजि

९ तेभमहामदैः पूरयामासगगनंगांतथैपदिशोदश

चं: ११ ॐऐंह्मूंनमः ततःकालीसमुत्पत्य गगनंक्ष्मामं

५ ताडयत् कराभ्यांतन्निनादेन प्राक्स्वनास्तेतिरोहि-

ताः १२ ॐऐंक्लींनमः अट्टट्टहासमशिवंशि

वदूतीचकारह तैःशब्दैरसुरास्त्रेसुः शुंभःकोपं

परंययौ १३ ॐऐंह्रौंनमः दुरात्मंस्तिष्ठस्तिष्ठ

ति व्याजहारांबिकायदा तदाजयेत्यभिहितं

देवैराकाशसंस्थितैः २४ ॐऐंह्स्त्रंनमः शुंभेना
गत्यया शक्तिर्मुक्ताज्वालातिभीषणा आयांती
वह्निकूटाभासानिरक्तामहोल्कया २५ ॐऐं
स्ह्रौंनमः सिंहनादेनशुंभस्य व्याप्तंलोकत्र
यांतरं निर्घातनिःस्वनोघोरो जितवानव
नीपते २६ ॐऐंज्रूंनमः शुंभमुक्तान्छरान्दे
वी शुंभस्तत्प्रहितान्छरान् चिच्छेदस्वशरै-

९ चं॰ १
६

हयैः शतशोथसहस्रशः २७ ॐ ऐं क्षीं नमः
ततः सा चंडिका क्रुद्धा शूलेनाभिजघानतं स
तदाभिहतो भूमौ मूर्छितो निपपात ह २८
ॐ ऐं ल्हीं नमः ततो निशुंभः संप्राप्य चेतना
मात्तकार्मुकः आजघान शरैर्देवीं कालीं के
सरिणं तथा २९ ॐ ऐं श्रीं नमः पुनश्च कृत्वा
बाहूनामयुतं दनुजेश्वरः चक्रायुतेन दितिज

च्छादयामासचंडिकां २१ ॐऐंस्थूंनमः ततो
भगवतीक्रुद्धा दुर्गादुर्गार्तिनाशिनी चिच्छेद
तानिचक्राणि स्वशरैःसायकांश्चतान् २१ ॐ
ऐंब्रंनमः ततोनिशुंभोवेगेन गदामादायचं
डिकां अभ्यधावतवैहंतुं दैत्यसैन्यसमावृतः २२
ॐऐंवींनमः तस्यापततएवाशु गदांचिच्छे
दचंडिका खड्गेनशितधारेण सचश्शूलंसमा

दुर्गा सं ७

ददे २२ ॐ ऐं ग्लूं नमः शूलहस्तं समायांतं
निशुंभममरार्द्दनं हृदि विव्याध शूलेन वे
गाविद्धेन चंडिका २४ ॐ ऐं श्मं नमः भिन्न
स्य तस्य शूलेन हृदयान्निःसृतोपरः महा
बलो महावीर्य स्तिष्ठेति पुरुषो वदन् २५
ॐ ऐं न्रं नमः तस्य निष्क्रामतो देवी प्रहस्य
स्वनवत्ततः शिरश्चिच्छेद खड्गेन ततोसाव

पतद्भुवि २६ ॐ ऐं क्रौं नमः ततः सिंहस्य च खा-
दीयं दंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथा
काली शिवदूतीतथापरान् २७ ॐ ऐं क्लौं न
मः कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महा
सुराः ब्रह्माणीमंत्रपूतेन तोयनान्येनि
राकृताः २८ ॐ ऐं ब्लौं नमः माहेश्वरीत्रिशूले
न भिन्नाः पेतुस्तथापरे वाराहीतुंडघातेन

९ चं० ८

केचिच्चूर्णीकृताभुवि ३९ ॐ ऐं स्लीं नमः खं
डखंडं च चक्रेण वैक्ष्णव्यादानवाकृताः वज्रेण
चैंद्रीहस्ताय विमुक्तेनन तथापरे ४० ॐ ऐं क्रूं
नमः केचिद्विनेशुरसुराः केचिन्नष्टामहा
हवात् भक्षिताश्चापरेकाली शिवदूतीमृगा
धिपैः ४१ इतिमार्कंडेयपुराणेसावर्णिकेम
न्वंतरे देवीमाहात्म्ये निशुंभवधोनामनव

मोऽध्यायः ५ सांगायैभैरव्यै तारादेव्यैमहा
हुतिंसमर्पयामिनमःस्वाहा ५ उवाचरश्लो
क २५ एवं ४८ एवमादितः ५४२ ॥ ॐ ॥

ए
चं
ए
९

९ ॐ अस्य नारायणी सप्तशतिका मंत्रस्य विश्वेश्वरी
चं महामाया दशमचरित्रस्य परमशिवऋषिः गा
१ यत्रीत्रिष्टुप्छंदः महामाया महाभद्रकाली श्रीम
हासुंदरीदेवता मायाबीजं आद्याशक्तिः त्रिपु
रेश्वकीलकं सूर्याग्निस्तत्त्वं आदिदेवमूर्तिमयी
आदिदेवमूर्तिमयी विश्वेश्वरीप्रीत्यर्थे दशम
चरितजपे विनियोगः अथ ध्यानं ॐ उत्तप्तहे

मरुचिरांरविचंद्रवह्निनेत्रां धनुःशरयुतांकुशाका
शपाशान् रम्यैर्भुजैश्चदधतींशिवशक्तिरूपां का
मेश्वरींहृदिभजामिधृतेंदुलेखां ऋषिरुवाच ॐ
ऐंश्रौंनमः निशुंभंनिहितंदृष्ट्वा भ्रातरंप्राणसंमितं
हन्यमानंवलंचैव शुंभः क्रुद्धोब्रवीद्वचः २ ॐऐंक्लीं
नमः वलावलेपदुष्टेत्वंमादुर्गेगर्वमावह अन्या
सांवलमाश्रित्य युद्ध्यसेयातिमानिनी ३ ॐऐंब्लूं

१९ नमः देव्युवाच ४ ॐऐंह्रांनमः एकैवाहंज
चं गत्यत्र द्वितीयाकाममापरा पश्यैताडुष्टमय्ये
२ व विशंत्योमद्विभूतयः ५ ॐऐंम्लूंनमः ऋषि
2 रुवाच ६ ॐऐंह्रूंनमः ततःसमस्तास्तादेव्यो ब्र
ह्माणीप्रमुखालयं तस्यादेव्यास्तनौजग्मुरेकैवा
सीत्तदांबिका ७ ॐऐंक्लींनमः देव्युवाच ॐऐंश्रैं
नमः अहंविभूत्याबहुभि रिहरूपैर्यदास्थिता

तत्संहृतंमयैकैवतिष्ठाम्याजौस्थिरोभव ९ ॐऐं

क्रींनमः ऋषिरुवाच १० ॐऐंधूंनमः ततःप्रव

वृतेयुद्धं देव्याःशुंभस्यचोभयोः पश्यतांसर्वदेवाना

मसुराणांचदारुणं ११ ॐऐंङ्कंनमः शरवर्षैःशितैः

शस्त्रैस्तथास्त्रैश्चैवदारुणैः तयोर्युद्धमभूद्भूयः सर्व

लोकभयंकरं १२ ॐऐंड्रौंनमः दिव्यान्यस्त्राणिश

तशो मुमुचेयान्यथांबिका बभंजतानिदैत्येंद्र-

९· स्तन्यतीघातकार्त्तैभिः १२ ॐ ऐं श्रीं नमः मुक्तानि
पं· तेनचास्त्राणि दिव्यानिपरमेश्वरी वमंजलीलयै
२ वोग्र ऊँकारोच्चारणादिभिः १४ ॐ ऐं ह्रूं नमः ततः-
3 शरशतैर्देवी माच्छादयतमोऽसुरः सापितत्कुपि
तादेवी धनुश्चिच्छेद चेषुभिः १५ ॐ ऐं वूं नमः छि
न्नेधनुषिदैत्येंद्र स्तथाशक्तिमथाददे चिच्छेददेवी
चक्रेण तामप्यस्यकरेस्थिता १६ ॐ ऐं श्रौं नमः ॥

ततः खड्गमुपादाय शतचंद्रंचभानुमत् अभ्य-
धावत्तदादेवीं दैत्यानामधिपेश्वरः १७ ॐऐंक्लींन
मः तस्यापततएवाशु खड्गंचिच्छेदचंडिका ध
नुर्मुक्तैः शितैर्बाणै श्चर्मंचार्ककरामलं १८ ॐऐं
ज्रुंनमः हताश्वः सतदादैत्य श्छिन्नधन्वाविसार
थिः जग्राहमुद्गरंघोर मंबिकानिधनोद्यतः १९
ॐऐंसौंनमः चिच्छेदापततस्तस्य मुद्गरंनिशितैः

९ शरैः तथापिसौम्यपावनां मुष्टिमुद्यम्यवेगवा
चं न् २० ॐ ऐं स्लूं नमः समुष्टिंपातयामास हृदये-
ध दैत्यपुंगवः देव्यास्तंचापिसादेवी तलेनोरस्यता
५ डयन् २१ ॐ ऐं स्रैं नमः तलप्रहाराभिहतो निप
पातमहीतले सदैत्यराजः सहसापुनरेवतथो
त्थितः २२ ॐ ऐं स्रां नमः उत्पत्यचप्रगृह्योच्चैर्दे
वींगगनमास्थितः तत्रापिसानिराधारा युयुधेते

नचंडिका २३ ॐ ऐं प्रीं नमः नियुद्धं खे तदा दैत्य श्चंडि
काच परस्परं चक्रतुः प्रथमं सिद्ध मुनिविस्मयका
रकं २४ ॐ ऐं फ्रां नमः ततो नियुद्धं सुचिरं कृत्वा ते
त्य
नांबिका सह उत्पाद्य भ्रामयामास चिक्षेप धर-
णीतले २५ ॐ ऐं क्रीं नमः स क्षिप्तो धरणीं प्राप्य मु
ष्टिमुद्यम्य वेगितः अभ्यधावत दुष्टात्मा चंडिका
निधनेच्छया २६ ॐ ऐं क्रूं नमः तमायांतं ततो देवी

९ चं ५ 5

सर्वदैत्यजनेश्वरं जगत्यांपातयामास भित्वाशू
लेनवक्षसि २७ ॐऐंसःनमः सगतासुःपपातो
र्व्यां देवीशूलाग्रविक्षतः चालयन्सकलांपृथ्वीं
साब्धिद्वीपांसपर्वतां २८ ॐऐंक्लींनमः ततःप्रस
न्नमखिलं हतेतस्मिन्दुरात्मनि जगत्स्वास्थ्यमती
वाप निर्मलंचाभवन्नभः २९ ॐऐंब्लेंनमः उत्पा
तमेघाःसोल्काये प्रागासंस्तेशमंययुः सरितो

मार्गवाहिन्य स्तथासंस्तत्रपातिते २॰ ॐ ह्रैंईंन
मः ततोदेवगणाः सर्वे हर्षनिर्भरमानसाः ब
भूवुर्निहतेतस्मिन् गंधर्वाललितंजगुः २१ ॐ
ह्रैंऊँनमः अवादयंस्तथैवान्ये ननृतुश्चाप्सरो
गणाः ववुःपुण्यास्तथावाताः सुप्रभोभूद्दिवा
करः २२ ॐह्रैंस्ल्क्ष्लींनमः जज्वलुश्चाग्नयःशांताः
शांतदिग्जनितस्वमनाः २२ इतिमार्कंडेयपुराणे

१ सावर्णिकेमन्वंतरेदेवीमाहात्म्येशुंभवधोना
चं मदशमोध्यायः १ ॐसांगायैसिंहासनायै
६ त्रिशूलपाशधारिण्यै महाङ्गतिंसमर्पयामि
6 नमःस्वाहा १ उवाच ५ अर्ध १ श्लोक २७ ए
वं ३२ एवमादितः ५७६ ॥ ः ॥

॥ पं. ॥

ॐअस्यत्रिपुरमहाभैरवीभुवनेश्वरीसप्तशाति
कामंत्रस्य भुवनेश्वरीएकादशाचरित्रस्य म
हाभैरवरुद्रोऋषिः नानाछंदांसि तारात्रिपु
रा तोतलाभुवनेश्वरीदेवता ॐ ह्रं ह्रं बीजं ॐ
ह्रं ह्रं शक्तिः ॐश्रीं क्लीं कीलकं ससिसूर्यते-
जोग्निमूर्तिमयी त्रिपुरानंदाभुवनेश्वरीएका
दशाचरित्रजपेविनियोगः अथध्यानं ॐउद्य

द्दिनद्युतिमिंदुकिरीटांतुंगकुचांनयनत्रययुक्तां-
स्मेरमुखींवरदांकुशपाशाभीतिकरांप्रभजेभुवने
शीम् ॥ ऋषिरुवाच ॥ ओंऐंश्रौंनमः देव्याहतेत
त्रमहासुरेंद्रे सेंद्राःसुरावह्निपुरोगमास्तां कात्या
यनींतुष्टुवुरिष्टलंभा द्विकासिवक्त्रास्तुविकासि-
ताश्ाः २ ओंऐंक्रूंनमः देवीप्रपन्नार्तिहरेप्रसी
द प्रसीदमातर्जगतोखिलस्य प्रसीदविश्वेश्व-

११ रिपाहिविश्वं त्वमीश्वरीदेवीचराचरस्य २ ॐ
चं: ऐंश्रींनमः आधारभूताजगतस्त्वमेका म
२ हीस्वरूपेणयतःस्थितासि अपांस्वरूपस्थि
२ तयात्वयै तदाप्यायतेकृत्स्नमलंघ्यवीर्ये ४
ॐऐंक्लींनमः त्ववैस्नशक्तिरनंतवीर्या विश्व
स्यवीजंपरमासिमाया संमोहितंदेविसम
स्तमेतत्त्वंवैप्रसन्नाभुविमुक्तिहेतुः ५ ॐऐं

ॐ नमः विद्याः समस्तास्तव देवि भेदाः स्त्रियः स
मस्ताः सकला जगत्सु त्वयैकया पूरितमंबयै
तत्का ते स्तुतिः स्तव्यपरापरोक्तिः ६ ॐ ऐं सौं न
मः सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी
त्वं स्तुता स्तुतये का वा भवंति परमोक्तयः ७
ॐ ऐं ह्रौं नमः सर्वस्य बुद्धिरूपेण जनस्य हृदि
संस्थिते स्वर्गापवर्गदे देवि नारायणि नमोस्तु

११ चं २ 3

ते ८ ॐऐंस्रूंनमः कलाकाष्ठादिरूपेणपरि
णामप्रदायिनि विश्वस्योपरतौशक्ते नाराय
णिनमोस्तुते ९ ॐऐंक्लींनमः सर्वमंगलमांग
ल्ये शिवेसर्वार्थसाधिके शरण्येत्र्यंबकेगौरिना
रायणिनमोस्तुते १० ॐऐंश्लौंनमः सृष्टिस्थिति
विनाशानांशक्तिभूतेसनातनि गुणाश्रयेगु
णमयेनारायणिनमोस्तुते ११ ॐऐंम्लौंनमः

शरणागतदीनार्त परित्राणपरायणे सर्व-
स्यार्तिहरे देवि नारायणि नमोस्तु ते १२ ॐ ऐं फ्रें
नमः हंसयुक्तविमानस्थे ब्रह्माणीरूपधा
रिणी कौशांभः क्षरिके देवि नारायणि न
मोस्तु ते १२ ॐ ऐं झीं नमः त्रिशूलचंद्राहिधरे
महावृषभवाहिनि माहेश्वरीस्वरूपेण ना
रायणि नमोस्तु ते १४ ॐ ऐं ह्लौं नमः मयूरकु

११
चं
ध
५

क्वाटवृते महाशक्तिधरेनघे कौमारीरूपसं
स्थाने नारायणीनमोस्तुते ॥५ ॐ ह्रें ह्रींनमः
शंखचक्रगदाशार्ङ्ग गृहीतपरमायुधे प्रसीद
वैष्णवीरूपेनारायाणिनमोस्तुते ॥६ ॐ ह्रें ह्रूं
नमः गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे व
राहरूपिणिशिवेनारायाणिनमोस्तुते ॥७ ॐ ह्रें
म्लींनमः नृसिंहरूपेणोग्रेणहंतुंदैत्यान्कृतो

घमे त्रैलोक्यत्राणसहिते नारायणिनमोस्तु
ते १८ ॐ ऐं ज्ञीं नमः किरीटिनिमहावज्रे सह
स्त्रनयनोज्ज्वले वृत्रप्राणहरे चैंद्रि नारायणिन
मोस्तुते १९ ॐ ऐं क्षैं नमः शिवदूतीस्वरूपेण
हतदैत्यमहाबले घोररूपेमहारावे नाराय-
णिनमोस्तुते २० ॐ ऐं क्रूं नमः दंष्ट्राकरालवद
ने शिरोमालाविभूषणे चामुंडेमुंडमथने-

११ नारायणिनमोस्तुते २१ ॐऐंह्रींनमः लक्ष्मिल
चं ज्जेमहाविद्ये श्रद्धेपुष्टिस्वधेध्रुवे महारात्रिम
५ हाविद्ये नारायणिनमोस्तुते २२ ॐऐंह्रूंनमः
S मेधेसरस्वतिवरे भूतिबाभ्रवितामसि नियते
त्वंप्रसीदेशे नारायणिनमोस्तुते २३ ॐऐंक्लीं
नमः सर्वस्वरूपेसर्वेशे सर्वशक्तिसमन्विते
भयेभ्यस्त्राहिनोदेवि दुर्गेदेविनमोस्तुते २४

ऊँऐंह्रूंनमः एतत्तेवदनंसौम्यं लोचनत्रयभू
षितं पातुनःसर्वभूतेभ्यः कात्यायनीनमोस्तु
ते २५ ऊँऐंह्रूंनमः ज्वालाकरालमत्युग्र मशे
षासुरसूदनं त्रिशूलंपातुनोभीते भद्रकालिन
मोस्तुते २६ ऊँऐंह्रंनमः हिनस्तिदैत्यतेजांसिस्व
नेनापूर्ययाजगत् साघंटापातुनोदेवि पापेभ्यो
नःसुतानिव २७ ऊँऐंह्रुंनमः असुरासृग्वसा

॥ चं ६ पंक चर्चितस्तिकरोज्ज्वलः सुभायखङ्गोभवतु चंडि
केत्वांनतावयं २८ ॐऐंहैंनमः रोगानशेषानपहंसि
तुष्टा रुष्टातुकामान्सकलानभीष्टान् त्वामाश्रिता
नांनविपन्नराणां त्वामाश्रितास्याश्रयतांनयांति २९
ॐऐंडंनमः एतत्कृतंयत्कदनंत्वयाद्यधर्म द्विषांदे-
विमहासुराणां रूपैरनेकैर्वहुधात्ममूर्तिं कृत्वांवि
केतत्प्रकरोतिकान्या ३० ॐऐंड्रौंनमः विद्यासुशास्त्रे

षुविवेकदीपे ष्वाद्येषुवाक्येषुचकात्त्वदन्या म
मत्वगर्तेतिमहांधकारे विभ्रामयत्येतदतीववि
श्वं २२ ॐऐंक्लींनमः रक्षांसियत्रोग्रविषाश्चना
गा यत्रारयोदस्युबलानियत्र दावानलोयत्रतथा
ब्धिमध्ये तत्रस्थितात्वंपरिपासिविश्वं २२ ॐऐंसूं
नमः विश्वेश्वरीत्वंपरिपासिविश्वं विश्वात्मिका
धारयसीतिविश्वं विश्वेशवंद्याभवतीभवंति वि

११ चं. ७

स्वाश्रयायेत्वयिभक्तिनम्राः २२ ॐ ऐं ह्रीं नमः
देवीप्रसीदपरिपालयनोरिभीते नित्यंयथासुर
वधादधुनैवसद्यः पापानिसर्वजगतांप्रशमंन-
याशु उत्पातपाकजनितांश्चमहोपसर्गान् २४
ॐ ऐं ब्लूं नमः प्रणतानांप्रसीदत्वं देविविश्वार्ति
हारिणि त्रैलोक्यवासिनामीड्ये लोकानांवरदा
भव २५ ॐ ऐं श्रीं नमः देव्युवाच २६ ॐ ऐं ल्हूं न

नमः वरदाहंसुरगणावरं यन्मनसेच्छथ तंवृ
णुध्वंप्रयच्छामि जगतामुपकारकं ॥३७ ॐ ह्रें-
ह्लौंनमः देवाऊचुः ॥३८ ॐ ह्रैंह्रैंनमः सर्वाबाधाप्र
शमनं त्रैलोक्यस्याखिलेश्वरि एवमेवत्त्वयाका
र्यं मस्मद्वैरिविनाशनं ॥३९ ॐ ह्रीं नमः देव्यु
वाच ४॰ ॐ ह्रेंश्रींनमः वैवस्वतेंतरेप्राप्ते अष्टा
विंशतिमेयुगे शुंभोनिशुंभश्चैवान्या वुत्प-

११ चं० ८

8

त्स्यते महासुरौ ४१ ॐ ऐं विं नमः नंदगोपगृहे
जाता यशोदागर्भसंभवा ततस्तौ नाशयिष्या
मि विंध्याचलनिवासिनी ४२ ॐ ऐं स्वं नमः पु
नरप्यतिरौद्रेण रूपेण पृथिवीतले अवतीर्य
हनिष्यामि वैप्रचित्तांस्तु दानवान् ४३ ॐ ऐं स्वीं
नमः भक्षयंत्याश्च तानुग्रान्वैप्रचित्तान्महासुरा
न् रक्तादंता भविष्यंति दाडिमीकुसुमोपमाः ४४

ॐ ऐं श्रां नमः ततो मां देवताः स्वर्गे मर्त्यलोके च-
मानवाः स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकां ४५
ॐ ऐं मं नमः भूयश्च शतवार्षिक्या मनावृष्ट्या
मनंभसि मुनिभिः संस्तुता भूमौ संभविष्याम्ययो
जौनिजा ४६ ॐ ऐं ब्लीं नमः ततः शतेन नेत्राणां
निरीक्षिष्यामि यन्मुनीन् कीर्तयिष्यंति मनुजाः
शताक्षीमिति मां ततः ४७ ॐ ऐं ल्तूं नमः ततोहम

॥ चं ४ ९

खिलंलोक मात्मदेहसमुद्भवैः भरिष्यामिसु

राः शाकै रावृष्टेः प्राणधारकैः ४८ ॐ ऐंह्रींमान

मः शाकंभरीतिविख्यातिं तदायास्याम्यहंभु

वि तत्रैवचवधिष्यामि दुर्गमाख्यंमहासुरं ४९

ॐ ऐंह्लूंनमः दुर्गादेवीतिविख्यातं तन्मेनामभ

विष्यति पुनश्चाहंयदाभीमं रूपंकृत्वाहिमा

चले ५० ॐ ऐंह्रींनमः रक्षांसिभक्षयिष्यामि-

मुनीनांत्राणकारनात् तदामांमुनयःसर्वे स्तो
ष्यंत्यानम्रमूर्तयः ५१ ॐहेंश्रींनमः भीमादेवी
तिविख्यातं तन्मेनामभविष्यति यदारुणाख्य
स्त्रैलोक्ये महावाधांकरिष्यति ५२ ॐहेंत्रौंनमः
तदाहंभ्रामरंरूपं कृत्वासंख्येयषट्पदं त्रैलो-
क्यस्यहितार्थाय वधिष्यामिमहासुरं ५३ ॐहें
श्रांनमः भ्रामरीतिचमांल्लोका स्तदास्तोष्यति

११ सर्वतः इत्थं यदा यदा बाधा दानवोत्था भवि
चं० ष्यति ५४ ॐ क्लीं नमः तदा तदावतीर्याहं-
१० करिष्याम्यरिसंक्षयं ५५ इति मार्कण्डेयपुरा
10 णे सावर्णिके मन्वंतरे देवीमाहात्म्ये नाराय
णीस्तुतिर्नामैकादशोऽध्यायः ११ ॐ सांगायै
सर्वनारायण्यै महाहुतिं समर्पयामि नमः स्वा
हा उवाच ४ अर्ध १ श्लो० ५० एवं ५५ एवमादितः ६२० ॥ ॥

९ ॐ अस्य देवीदुर्गामहात्मस्य सप्तशातिकामं
पं. त्रस्य द्वादशाचरितस्य किरातरूपईश्वरोऋ
१ षिः महाविद्यानवदुर्गादेवता अनुष्टुप्छं
दः आंआंवीजं ईंईंशक्तिः ऊंऊंकीलकं श्री
शेषेस्तत्वं सर्वविद्यामूर्तिमयी श्रीमहावि
द्यानवदुर्गाप्रीत्यर्थे द्वादशाचरित सूर्यसह
स्रतेजांसिजपे विनियोगः अथध्यानं

ॐ विद्युद्दामसमप्रभां मृगपति स्कंधस्थि
तां भीषणां कन्याभिः करवालखेटविल
सद्धस्ताभिरासेवितां हस्तैश्चक्रगदासिखेट
विशिखां श्चापं गुणां तर्जनीं बिभ्राणामन
लात्मिकां शशिधरां दुर्गां त्रिनेत्रां स्मरे ॥ ॐ
ह्रीं श्रीं नमः देव्युवाच ॥ ॐ ऐं ह्रीं नमः एभिस्त
वैश्च मां नित्यं स्तोष्यते यः समाहितः तस्या

१२ हंसकलांवाधां नाशयिष्याम्यसंशयं २ ॐ
चं॰ ऐंश्रींनमः ॐमधुकैटभनाशंच महिषासु
२ रघातनं कीर्तयिष्यंतियेतद्व द्वधंशुंभनि
2 शुंभयोः ३ ॐऐंईंनमः अष्टम्यांचचतुर्द
श्यां नवम्यांचैकचेतसः श्रोष्यंतिचैवयेभ
क्त्या ममामाहात्म्यमुत्तमं ४ ॐऐंक्लौंनमः
नतेषांदुष्कृतंकिंचि दुष्कृतोत्थानचापदः ।

भविष्यतिनदारिद्र्यं नचैवेष्टवियोजनं ५
ॐऐंक्लूंनमः शत्रुतोनभयंतस्य दस्युतोवा
नराजतः नशस्त्रानलतोयौघा त्कदाचित्सं
भविष्यति ६ ॐऐंस्थूंनमः तस्मान्ममैत
न्माहात्म्यं पठितव्यंसमाहितैः श्रोतव्यंच
सदाभक्त्या परंस्वस्त्ययनंमहत् ७ ॐऐंश्रां
नमः उपसर्गानशेषांस्तु महामारीसमुद्भ

१९ वान् तथात्रिविधमुत्पातं माहात्म्यंश्राये
चं न्मम ८ ॐ ऐं ह्रूं नमः यत्रैतत्पठ्यते सम्य
२ ङ्नित्यमायतनेमम सदाननद्विमोक्ष्यामि सा
३ न्निध्यंतत्रमेस्थितं ९ ॐ ऐं विं नमः वलिप्रदा
नेपूजायामग्निकार्येमहोत्सवे सर्वंममैत
च्चरित मुच्चार्यंश्राव्यमेवच १० ॐ ऐं ङ्कं नमः
जानताजानतावापि वलिपूजांतथाकृतां ।

प्रतीछिष्याम्यहंप्रीत्या वह्निहोमंतथाकृतं ॥११

ॐऐंक्लैंनमः शरत्कालेमहापूजा क्रियतेयाच

वार्षिकी तस्यांममैतन्माहात्म्यं श्रुत्वाभक्ति

समन्वितः ॥१२ ॐऐंटांनमः सर्वावाधाविनिर्मु

क्तो धनधान्यसुतान्वितः मनुष्योमत्प्रसादेन

भविष्यतिनसंशयः ॥१३ ॐऐंचैंनमः श्रुत्वाम

मैतन्माहात्म्यं यथाचोत्पतयःशुभा पराक्र

१२ मंचयुद्धेषु जायतेनिर्भयःपुमान् ।४ ॐ ऐं
चं ह्रीं नमः रिपवःसंक्षयंयांति कल्याणंचो
४ पपद्यते नंदतेचकुलंपुंसां माहात्म्यंमम
श्रृण्वतां ।५ ॐ ऐं ह्रीं नमः शांतिकर्मणिसर्व
त्र तथादुःस्वप्नदर्शने ग्रहपीडासुचोग्रासुमा
हात्म्यंश्रृणुयान्मम ।६ ॐ ऐं ह्रीं नमः उपस
र्गाः शमंयांति ग्रहपीडाश्चदारुणाः दुःस्वप्नं-

चन्द्राभिर्दृष्टं सुस्वप्नमुपजायते ७ ऊंऐंम्लूंन
मः वालग्रहाभिभूतानां वालानांशांतिकार
कं संघातभेदे चन्द्रणांमैत्रीकरणमुत्तमं ८
ऊंऐंक्लींनमः दुर्वृत्तानामशेषाणां बलहानि-
कारंपरं रक्षोभूतपिशाचानां पठनादेवनाश
नं ९ ऊंऐंल्हींनमः सर्वंममैतन्माहात्म्यं म
मसन्निधिकारकं पशुपुष्पार्घ्यधूपैश्च गंध-

१९ दीपैस्तथोत्तमैः २० ॐ ह्रैं ह्रौं नमः विप्राणांभो
चं जनैर्होमैः प्रोक्षणीयैरहर्निशं अन्यैश्चविवि
५ धैर्भोगैः प्रदानैर्वत्सरेणया २१ ॐ ह्रैं श्रूं नमः
प्रीतिर्मेक्रियतेसास्मिन्सकृत्सुच्चरितेश्रुते
श्रुतंहरतिपापानि तथारोग्यंप्रयच्छति २२
ॐ ह्रैं श्रौं नमः रक्षांकरोतिभूतेभ्यो जन्मनां
कीर्तनंमम युद्धेषुचरितंयन्मे दुष्टदैत्यनि

वर्हणां २२ ॐ ऐं ऐं नमः तस्मिन्स्तुते वैरी कृ
तं भयं पुंसां न जायते युष्माभिः स्तुतयो या
श्च याश्च ब्रह्मर्षिभिः कृताः २४ ॐ ऐं श्रौं नमः
ब्रह्मणा च कृता यास्ताः प्रयच्छंति शुभां मतिं
अरण्ये प्रांतरे वापि दावाग्निपरीवारितः २५
ॐ ऐं ङं नमः दस्युभिर्वा वृतः शून्ये गृहीतो वा
पिशाचुभिः सिंहव्याघ्रानुयातो वा वने वा वन

९ हस्तिभिः २६ ॐ ऐं ऌं नमः राज्ञा क्रुद्धेन चाज्ञ
चं॰ प्तो वध्यो वंधगतोपि वा आघूर्णितो वा वातेन
६ स्थितः पोते महार्णवे २७ ॐ ऐं औं नमः पत
६ त्सु चापि शस्त्रेषु संग्रामे भृशदारुणे सर्वा वा
धासु घोरासु वेदनाभ्यर्दितोपि वा २८ ॐ ऐं
ऌं नमः स्मरन्ममैतच्चरितं नरो मुच्येत संकटा
त् ममप्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा २९

ॐऐंरैंनमः दूरादेवपलायंते स्मरतश्चरितंम
म ॥ ॐऐंह्रूंनमः ऋषिरुवाच ॥ ॐऐंश्रीं
नमः इत्युक्त्वासाभगवती चंडिकाचंडावि-
क्रमा ॥ ॐऐंश्रीं नमः पश्यतामेवदेवानां
तत्रैवांतरधीयत तेपिदेवानिरातंकाः स्वा
धिकारान्यथापुरा ॥ ॐऐंहंनमः यज्ञभाग
भुजःसर्वे चक्रुर्विनिहतारयः दैत्याश्चदेव्यानि

९ हते शुम्भेदेवरिपौयुधि ३४ ॐऐंग्रंनमः ज
पं गद्विध्वंसके तास्मिमहोग्येतुलविक्रमे निशुं
७ भेचमहावीर्ये शेषाः पातालमाययुः ३५
ॐऐंइंनमः एवंभगवतीदेवी सानित्यापि
पुनःपुनः संभूयकुरुतेभूप जगतःपरिपा
लनं ३६ ॐऐंग्रांनमः तयैतन्मोह्यतेविश्वं
सैवविश्वंप्रसूयते सायाचिताचविज्ञानं तु

ष्ठाऋद्धिंप्रयच्छति २७ ओंऐंउंनमः व्याप्तंतये
तत्सकलं ब्रह्मांडमनुजेश्वर महाकाल्पाम-
हाकाले महामारीस्वरूपया २८ ओंऐंश्रीं
नमः सैवकालेमहामारी सैवसृष्टिर्भवत्य
जा स्थितिंकरोतिभूतानां सैवकालेसनात
नी २९ ओंऐंनंनमः भावकालेन्नृणांसैव ल
क्ष्मीवृद्धिप्रदागृहे सैवाभावेतथालक्ष्मीर्विना

१२ शायोपजायते ४० ॐ ऐं ह्रीं नमः स्तुतासं
चं० पूजिता पुष्पैर्धूपगंधादिभिस्तथा ददाति वित्तं
८ पुत्रांश्च मतिं धर्मे गतिं शुभां ४१ इति मार्कं
8 डेयपुराणे सावर्णिके मन्वंतरे देवीमाहा-
त्म्ये भगवतीवाक्यं नाम द्वादशोऽध्यायः १२
ॐ सांगायै बालात्रिपुरसुंदर्यै महाहुतिं समर्प
यामि नमः स्वाहा १२ उवाच २ अर्ध २ श्लो० ३७ एवं ४१ एवमादितः
६७०॥

(२ पं. १

ॐअस्यबालापंचाक्षरीसुंदरी महामंत्रस्यद
क्षिणामूर्तिमयी आदित्यवात् ऋषिः पंक्ति
छंदः बालासुंदरीदेवता ऐंबीजं क्लींशक्तिः-
स्त्रींह्लींकीलकं सोहंआत्मनःश्रेयोर्थेपाठे
विनियोगः अथध्यानं ॐबालार्कमंडला
भासां चतुर्बाहुंत्रिलोचनां पाशांकुशशरां
श्चापंधारयंतींशिवांभजे १ पद्मासनस्थांक

रपंकजाभ्यां रक्तोत्पलेसंदधतीं त्रिनेत्रां संवि
भ्रतीमाभरणानिरक्तां पद्मावतींपद्ममुखींन
मामि १२ ॐऐंह्रींनमः ऋषिरुवाच १ॐ
ऐंॐनमः एतत्तेकाथितंभूप देवीमाहात्म्य
मुत्तमं एवंप्रभावासादेवी ययेदंधार्यतेज
गत् २ ॐऐंश्रींनमः सायदास्तूयतेपुंभि स्ते
सर्वेविगतज्वराः विद्यातथैवाक्रियते भगव

१२ चं २

द्विष्णुमायया २ ॐ ह्रैं ईं नमः तयात्वमेषवैश्य
श्च तथाचान्येविवेकिनः मोह्यंतेमोहिता
श्चैव मोहमेष्यंतिचापरे ४ ॐ ह्रैं श्रीं नमः
तामुपैहिमहाराज शरणंपरमेश्वरीं आरा-
धितासैवनृणां भोगस्वर्गापवर्गदा ५ ॐ ह्रैं
श्रांनमः मार्कंडेयउवाच ६ ॐ ह्रैं ॐ नमः इ
तितस्यवचःश्रुत्वा सुरथःसनराधिपः ७

ॐ ऐं सौं नमः प्रणिपत्यमहाभागं तमृषिं-
संशितव्रतं निर्विण्णोतिममत्वेन राज्यापह
रणेनच ८ ॐ ऐं स्रूं नमः जगामसद्यस्तपसे
सचवैश्योमहामुने संदर्शनार्थमंवाया न
दीपुलिनसंस्थितः ९ ॐ ऐं क्रीं नमः सचवैश्य
स्तपस्तेपे देवीसूक्तं परंजपन् तौतस्मिन्पुलिने
देव्याः कृत्वामूर्तिंमहीमयीं १० ॐ ऐं ह्रूं नमः -

१२
चं
२
3

ग्रर्हणांचक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः नि
राहारौयताहारौ तन्मनस्कौसमाहितौ ॥ ॐ
ऐंह्लूंनमः ददतुस्तौबलिंचैव निजगात्रासृगु
क्षितं एवंसमाराधयतो स्त्रिभिर्वर्षैर्यतात्म
नोः १२ ॐऐंक्लींनमः परितुष्टाजगद्धात्री प्र
त्यक्षंप्राहचंडिका १२ ॐऐंक्लौंनमः देव्युवा
च १४ ॐऐंह्लींनमः यत्प्रार्थ्यतेत्वयाभूप

त्वयाचकुलनंदन १५ ॐऐंश्रींनमः मत्तस्त
त्प्राप्यतांसर्वं परितुष्टाददामितत् १६ ॐऐंक्लीं
नमः मार्कंडेयउवाचः ततोवव्रेन्नृपोराज्य म
विभ्रंश्यन्यजन्मनि १७ ॐऐंक्रौंनमः अत्रैवचनि
जंराज्यं हतशत्रुवलंवलात् सोपिवैश्यस्ततोज्ञा
नं वव्रेनिर्विस्समानसः १८ ॐऐंह्रूंनमः ममे-
त्यहमितिप्राज्ञः संगविच्युतिकारकं २० ॐऐंह्रूं

१२
चं.
४
५

नमः देव्युवाच २१ ॐ ऐं ह्रीं नमः स्वल्पैरहोभि
र्नृपतै स्वराज्यं प्राप्स्यते भवान् २२ ॐ ऐं श्रीं नमः
हत्वारिपूनस्खलितं तवतत्र भविष्यति मृतश्च
भूयः संप्राप्य जन्मदेवाद्विवस्वतः २३ ॐ ऐं ऊं
नमः सावर्णिको मनुर्नाम भवान्भुवि भवि-
ष्यति वैश्यवर्यत्वया यश्च वरोस्मत्तोभिवां
छितः २४ ॐ ऐं ह्रौं नमः तं प्रयच्छामि संसि-

ह्यै तवज्ञानंभविष्यति २५ ॐऐंसौंनमः मार्कं
डेयउवाच २६ ॐऐंहौंनमः इतिदत्वातयोर्देवी
यथाभिलषितंवरं २७ ॐऐंश्रांनमः वभूवांत
र्हितासद्यो भक्त्यातांभ्यामभिष्टुता एवंदेव्यावरं
लब्ध्वा सुरथःक्षत्रियर्षभः २८ ॐऐंक्लींनमः सू
र्याज्जन्मसमासाद्य सावर्णिर्भवितामनुः २९ॐ
ऐंॐनमः ॐसावर्णिर्भवितामनुः इतिमार्कंडे-

नं०९६ प०२५५

१२ यपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये सु
चं० रथवैश्ययोर्वरप्रदानं नाम त्रयोदशोध्यायः १२
५ सांगायै श्रीमत्रिपुरसुंदर्यै महाज्ञतिं समर्पया
S मि नमः स्वाहा १२ उवाच ६ अर्ध ॥ श्लोक १२
एवं २४ एवमादितः ७०० ॥ ॥

अथोत्तरन्यासः खड्गिनीशूलिनीघोरा गदि
नीचक्रिणीतथा शंखिनीचापिनीबाणभुशुं
डीपरिघायुधा हृदयायनमः शूलेनपाहि
नोदेवि पाहिखड्गेनचांबिके घंटास्वनेननःपा
हि चापज्यानिःस्वनेचच शिरसेस्वाहा प्राच्यां
रक्षप्रतीच्यांच चंडिकेरक्षदक्षिणे भ्रामणेना
त्मशूलस्यउत्तरस्यांतथेश्वरी शिखायैवषट्

न्या· सौम्यानियानिरूपाणि त्रैलोक्येविचरंतिते
१ यानिचात्यर्थघोराणि तैरक्षास्मांस्तथाभुवं
कवचायहुं खड्गशूलगदादीनि यानिचास्त्रा
णितेंविके करपल्लवसंगीनि तैरस्मान्रक्षस
र्वतः नेत्रत्रयायवौषट् सर्वस्वरूपेसर्वेशे
सर्वशक्तिसमन्विते भयेभ्यस्त्राहिनोदेवि दु
र्गेदेविनमोस्तुते अस्त्रायफट् विद्युद्दामस

मेघाभां मृगपति स्कंधस्थितां भीषणां कन्या
भिः करवालखेटविलसद्धस्ताभिरासेवितां ह
स्तैश्चक्रधरालिखेटविशिखांश्चापं गुणं तर्ज
नीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां-
त्रिनेत्रां भजे । इति ध्यानम् ॥

न्या·
२
2

ॐनमोदेव्यै अथदेवीसूक्तं नमोदेव्यैम
हादेव्यै शिवायैसततंनमः नमःप्रकृत्यै
भद्रायै नियताःप्रणताःस्मतां १ रौद्रायैन
मोनित्यायै गौर्य्यैधात्र्यैनमोनमः ज्योत्स्ना
यैचेंदुरूपिण्यै सुखायैसततंनमः २ कल्या
ण्यैप्रणतांवृद्ध्यै सिद्ध्यैकुर्मोनमोनमः नैर्ऋ
त्यैभूभृतांलक्ष्म्यै शर्वाण्यैतेनमोनमः २

दे: दुर्गायैदुर्गपारायै सारायैसर्वकारिण्यै ख्या
८ त्यैतथैवकृष्णायै धूम्रायैसततंनमः ४
अतिसौम्यातिरौद्रायै नतास्तस्यैनमोनमः
नमोजगत्प्रतिष्ठायै देव्यैकृत्यैनमोनमः
५ यादेवीसर्वभूतेषु विष्णुमायेतिशब्दिता
नमस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः
६ यादेवीसर्वभूतेषु चेतनेत्यभिधीयते

नमस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः ७
यादेवीसर्वभूतेषु बुद्धिरूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः ८
यादेवीसर्वभूतेषु निद्रारूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः ९
यादेवीसर्वभूतेषु क्षुधारूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः १०

दे: यादेवीसर्वभूतेषु छायारूपेणसंस्थिता
२ नमस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः
2 ११ यादेवीसर्वभूतेषु शक्तिरूपेणसंस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः
१२ यादेवीसर्वभूतेषु तृष्णारूपेणसंस्थि
ता नमस्तस्यै नमस्तस्यै नमस्तस्यैनमो
नमः १३ यादेवीसर्वभूतेषु क्षांतिरूपे

णासंस्थिता नमस्तस्यै नमस्तस्यैनमोनमः १४
यादेवीसर्वभूतेषु जातिरूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः १५
यादेवीसर्वभूतेषु लज्जारूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः १६
यादेवीसर्वभूतेषु शांतिरूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः १७

दे: यादेवीसर्वभूतेषु श्रद्धारूपेणसंस्थिता नम
२ स्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः १८
3 यादेवीसर्वभूतेषु कांतिरूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः १९
यादेवीसर्वभूतेषु लक्ष्मीरूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः २०
यादेवीसर्वभूतेषु वृत्तिरूपेणसंस्थिता न

मस्तस्यै नमस्तस्यैनमस्तस्यैनमोनमः २१
यादेवीसर्वभूतेषु स्मृतिरूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः २२
यादेवीसर्वभूतेषु दयारूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः २३
यादेवीसर्वभूतेषु तुष्टिरूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः २४

दे:
४
५

यादेवीसर्वभूतेषु मातृरूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः २५
यादेवीसर्वभूतेषु भ्रान्तिरूपेणसंस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यैनमोनमः २६
इंद्रियाणामधिष्ठात्री भूतानांचाखिलेषुया -
भूतेषुसततंतस्यै व्याप्तिदेव्यैनमोनमः २७
चितिरूपेणयाकृत्स्न मेतद्व्याप्यास्थिताजग

त् नमस्तस्यै नमस्तस्यै नमस्तस्यैनमोन
मः २८ स्तुतासुरैः पूर्वमभीष्टसंश्रया त
थासुरेन्द्रेणदिनेषुसेविता करोतुसानःशुभ
हेतुरीश्वरी शुभानिभद्राण्यभिहन्तुचापदः २९
यासांप्रतंचोद्धतदैत्यतापि तैरस्माभिरीशा
चसुरैर्नमस्यते याचस्मृतातत्क्षणमेवहन्ति
नः सर्वापदोभक्तिविनम्रमूर्तिभिः ३० गुह्या

दे तिगुह्यगोप्त्रीत्वं गृहाणास्मत्कृतंजपं सिद्धि
५ र्भवतुमेदेवि त्वत्प्रसादान्महेश्वरि ३१ इति-
s देव्यावामहस्तेजपंनिवेदयेत् ॥

प्रा॰ ॐश्रीगणेशायनमः अस्यश्रीसप्तशतीरह
१॰ स्यत्रयस्य नारायणऋषिः अनुष्टुप्छंदः म
१ हाकाली महालक्ष्मी महासरस्वतीदेवता य
थोक्तफलावाप्त्यर्थंजपेविनियोगः राजोवा
च भगवन्नवतारामे चंडिकायास्त्वयोदिताः
एतेषांप्रकृतिंब्रह्म न्प्रधानंवक्तुमर्हसि १
आराध्यंयन्मयादेव्याः स्वरूपंयेनतद्द्विज ।

विधिनाब्रूहिसकलं यथावत्प्रणतस्यमे २
ऋषिरुवाच इदंरहस्यंपरमनाख्येयं प्रचक्ष
ते भक्तोसीति नमेकिंचित्तवावाच्यंनराधिप ३
सर्वस्याद्यामहालक्ष्मी स्त्रिगुणापरमेश्वरी ल
क्ष्यालक्ष्यस्वरूपासा व्याप्यकृत्स्नंव्यवस्थिता ४
मातलुंगंगदांखेटं पानपात्रंचबिभ्रती नागं
लिंगंचयोनिंच बिभ्रतीनृपमूर्धनि ५ तप्त

6

प्रा॰ कांचनवर्णाभा तप्तकांचनभूषणा शू
२॰ न्यंतदखिलंस्वेन पूरयामासतेजसा ६ शू
२ न्यंतदखिलंलोकं विलोक्यपरमेश्वरी ब
भाररूपमपरं तमसाकेवलेनहि ७ सा
भिन्नांजनसंकाशा दंष्ट्रांचितवरानना वि
शाललोचनानारी बभूवतनुमध्यमा ८
खड्गपात्राशिरःखेटै रलंकृत्यचतुर्भुजा क

वंधशिरसोहारं विभ्राणाहिशिरःस्रजं ९ सा
प्रोवाचमहालक्ष्मीं तामसीप्रमदोत्तमा ना
मकर्मचमेमातर्देहितुभ्यंनमोनमः ९ तां
प्रोवाचमहालक्ष्मी स्तामसींप्रमदोत्तमां द
दामितवनामानि यानिकर्माणितानिच ११
महामायामहाकाली महामारीक्षुधातृषा
निद्रातृष्णाचैकवीरा कालरात्रिर्दुरत्यया १२

प्रा॰ २॰ २ 3

इमानितवनामानि प्रतिपाद्यानिकर्मभिः
एभिःकर्माणितेज्ञात्वा योधीतेसोश्नुतेसुखं
३ तामित्युक्त्वामहालक्ष्मीः स्वरूपमपरंनृ
प सत्त्वाख्येनातिशुद्धेन गुणेनेंदुप्रभंदधौ
४ अक्षमालांकुशधरा वीणापुस्तकधारि
णी साबभूववरानारी नामान्यस्यैचसाद
दौ ५ महाविद्यामहावाणी भारतीवाक्

सरस्वती आर्याब्राह्मीकामधेनु र्वेदगर्भाचधी
श्वरी ॥६॥ अथोवाचमहालक्ष्मी र्महाकालीं
सरस्वतीं युवांजनयतांदेव्यो मिथुनेस्वानु
रूपतः ॥७॥ इत्युक्त्वातेमहालक्ष्मीः ससर्जमि
थुनंस्वयं हिरण्यगर्भौरुचिरौ स्त्रीपुंसौकम
लासनौ ॥८॥ ब्रह्मन्विधेविरंचेति धातरित्या
हतंनरं श्रीःपद्मेकमलेलक्ष्मी त्याहमाता-

श्रा० ५ ४

स्त्रियंचतां ९ महाकालीभारतीच मिथुनेस्र
जतःसह एतयोरपिरूपाणि नामानिचवदा
मिते २ नीलकंठंरक्तवाहुं श्वेतांगंचंद्रशेख
रं जनयामासपुरुषं महाकालीसितांस्त्रियं २१
सरुद्रःशंकरःस्थाणुः कपर्दींचत्रिलोचनः त्र
यीविद्याकामधेनुः साध्वीभाषाक्षरास्वरा २२ स
रस्वतीस्त्रियंगौरीं कृष्णांचपुरुषंनृप जनयामा

सनामानि तयोरपिवदामिते २३ विष्णुःकृष्णो
हृषीकेशो वासुदेवोजनार्दनः उमागौरीसती
चंडी सुंदरीसुभगाश्शुभा २४ एवंयुवतयःसद्यः
पुरुषत्वंप्रपेदिरे चक्षुष्मंतोनुपश्यंति नेतरेतद्वि
दोजनाः २५ ब्रह्मणेप्रददौपत्नीं महालक्ष्मींन्टप
त्रयीं रुद्रायगौरींवरदां वासुदेवायचश्रियं २६
स्वरयासहसंभूय विरंचोऽडमजीजनत् विभेद-

प्रा· भगवान्रुद्र स्तद्गौर्यासहवीर्यवान् २७ ब्रंडम
२· ध्येप्रधानादि कार्यजातमभून्तप महाभूता-
५ त्मकंसर्वं जगत्स्थावरजंगमं २८ पुपोषपाल
5 यामासतल्लक्ष्म्यासहकेशवः संजहारजगत्स
र्वं सहगौर्यामहेश्वरः २९ महालक्ष्मीर्महाराज
सर्वसत्त्वमयीश्वरी निराकाराचसाकारा सै
वनानाभिधानभृत् २· नामांतरैर्निरूप्यैषा-

नाम्नानान्येनकेनचित् ३८ इतिप्राधानिकं
रहस्यसमाप्तम् ॥ :: ॥

ऋषिरुवाच त्रिगुणातामसीदेवी सात्विकी
यात्वयोदिता साशर्वाचंडिकादुर्गा भद्राभग
वतीर्यते १ योगनिद्राहरेरुक्ता महाकाली
तमोगुणा मधुकैटभनाशार्थं यांतुष्टावांबु
जासनः २ दशवक्त्रादशभुजा दशपादांजन
प्रभा विशालयाराजमाना त्रिंशल्लोचनमालया ३
स्फुरद्दशनदंष्ट्रा साभीमरूपापिभूमिप रूप-

वै. सौभाग्यकांतीनां साप्रतिष्ठामहाश्रियां ४ खं
१. ड्गवाणगदाशूल शंखचक्रभुसुंडिभृत परि
८ घंकार्मुकंशीर्षं निश्चोतद्रुधिरंदधौ ५ एषासा
वैष्णवीमाया महाकालीदुरत्यया आराधिता
वशीकुर्यात्पूजाकर्तुश्चराचरं ६ सर्वदेवश
रीरेभ्यो याविर्भूतामितप्रभा त्रिगुणासामहा
लक्ष्मीः साक्षान्महिषमर्दिनी ७ श्वेताननानी

लभुजा सुश्वेतस्तनमंडला रक्तमध्यारक्तपादा

नीलजंघोरुरुन्मदा ८ सुचित्रजघनाचित्र मा

ल्यांबरविभूषणा चित्रानुलेपनाकांति रूपसौ

भाग्यशालिनी ९ अष्टादशाभुजापूज्या सास

हस्रभुजासती आयुधान्यत्रवक्ष्यंते दक्षिणाधः

कारक्रमात् १० अक्षमालाचकमलं वाणोसि-

कुलिशंगदा चक्रंत्रिशूलंपरशुः शंखोघंटाच

वै॰ र॰ २ 2

पाशकः ११ शक्तिर्दंडश्चर्मचापं पानपात्रंकमंड
लुः अलंकृतभुजामेभि रायुधैःकमलासनां
१२ सर्वदेवमयीमीशां महालक्ष्मीमिमांनृप
पूजयेत्सर्वलोकानां सदेवानांप्रभुर्भवेत् १३
गौरीदेहात्समुद्भूता यासत्त्वैकगुणाश्रया साक्षा
त्सरस्वतीप्रोक्ता शुंभासुरनिवर्हिणी १४ दधौचा
ष्टभुजाबाणा न्मुसलंशूलचक्रभृत् शंखंघंटां

लांगलंच कार्मुकंवसुधाधिप ॥५॥ एषासंपूजि
तामक्त्या सर्वत्त्वंप्रयच्छति निशुंभमाथिनीदे
वी शुंभासुरनिवर्हिणी ॥६॥ इत्युक्तानिस्वरूपा-
णि मूर्तीनांतवपार्थिव उपासनंजगन्मातुः
पृथगासांनिशामय ॥७॥ महालक्ष्मीर्यदापूज्या
महाकालीसरस्वती दक्षिणोत्तरयोःपूज्ये पृष्ठतो
मिथुनत्रयं ॥८॥ विरंचिःस्वरयामध्ये रुद्रोगौर्या

षो· च दक्षिणे वामेलक्ष्म्याहृषीकेशः पुरतोदेवता
२ त्रयं १९ अष्टादशभुजामध्ये वामेचास्यादशा
२ नना दक्षिणेष्टभुजालक्ष्मी र्महतीतिसमर्चये
३ त् २० पूर्वादिदलतः पूज्या असितांगादिभैरवाः
अष्टादशभुजाचैषा यदापूज्यानराधिप २१
दशाननाचाष्टभुजा दक्षिणोत्तरयोस्तदा दशा
ननायदापूज्या दक्षिणोत्तरयोस्तदा २२ काल-

म्हत्मूचसंपूज्यौ सर्वारिष्टप्रशांतये यदाचाष्ट
भुजापूज्याशुंभासुरनिवर्हिणी २२ नवास्याः
शक्तयःपूज्या स्तदारुद्राविनायकौ नमोदे
व्याइतिस्तोत्रै महालक्ष्मींसमर्चयेत् २४ अव
तारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः अष्टादश
भुजाचैषा पूज्यामहिषमर्दिनी २५ महालक्ष्मी
र्महाकाली सैवप्रोक्तासरस्वती ईश्वरीपुण्यपा

वै· पानां सर्वलोकमहेश्वरी २६ महिषांतकरीये
१· न पूजितास्सजगत्त्रमुः पूजयेज्जगतांधात्रीं चं
४ डिकां भक्तवत्सलां २७ अर्घ्यादिभिरलंकारै र्गंध
पुष्पैस्तथोत्तमैः धूपैर्दीपैश्च नैवेद्यै र्नानाभक्ष्य
समन्वितैः २८ रुधिराक्तेनवलिना मांसेनसु
रयान्टप वलिमांसादिपूजेयं विप्रवर्ज्यामये
रिता २९ तेषांकिलसुरामांसैर्नोक्तापूजान्टपक्व

चित् प्राणामाचमनीयैश्च चंदनेनसुगंधिनाः
सकर्पूरैश्चतांवूलैर्भक्तिभावसमन्वितैः वाममा
गेयतोदेव्या छिन्नशीर्षंमहासुरं २१ पूजये
न्महिषंयेनप्राप्तंसायुज्यमीशया दक्षिणे पु
रतःसिंहं समयंधर्ममीश्वरं २२ वाहनंपूजये
देव्या धृतंयेनचराचरं ततःकृतांजलिर्भूत्वा
स्तुवीतचरितैरिमैः २२ एकेनवाममध्यमेन नै

वै॰
र॰
५
८

केनेतरयोरिह चरितार्थंतुनजपे ज्जपश्छिद्रम-
वाप्नुयात् २४ स्तोत्रमंत्रैःस्तुवीतेमां यदिवा
जगदंबिकां प्रदक्षिणानमस्कारा न्कृत्वामूर्ध्नि
कृतांजलिः २५ क्षमापयेज्जगद्धात्रीं मुहुर्मु
हुरतंद्रितः प्रतिश्लोकंचजुहुया त्पायसंति-
लसर्पिषा २६ जुहुयात्स्तोत्रमंत्रैर्वा चंडिका
यैशुभंहविः भूयोनामपदैर्देवीं पूजयेत्स्तु

समाहितः २७ प्रयतःप्रांजलिःप्रह्वःप्राणा-
नारोप्यचात्मनि सुचिरंभावयेद्देवीं चंडि-
कांतन्मयोभवेत् २८ एवंयःपूजयेद्भक्त्याप्र
त्यहंपरमेश्वरीं भुक्त्वाभोगान्यथाकामं दे
वीसायुज्यमाप्नुयात् २९ योनपूजयते
नित्यं चंडिकांभक्तवत्सलां भस्मीकृत्यास्यपु
ण्यानि निर्दहेत्परमेश्वरी ३० तस्मात्पूजयभू

वै॰ र॰ ६

पाल सर्वलोकमहेश्वरीं यथोक्तेनविधाने
न चंडिकांसुखमाप्स्यसि ४२ इतिवैकृतिकं
रहस्यंसमाप्तम् ॥

6

ऋषिरुवाच नंदाभगवतीनाम याभाविष्य
तिनंदजा स्तुतासंपूजिताभक्त्या वशीकुर्या
ज्जगत्त्रयं १ कनकोत्तमकांतिः सा सुकांतिः
कनकांबरा देवीकनकवर्णाभा कनकोत्त
मभूषणा २ कमलांकुशपाशाब्जै रलंकृ
तचतुर्भुजा इंदिराकमलालक्ष्मीः साश्रीरु
क्मांबुजासना ३ यारक्तदंतिकानाम देवी

सू: २८ प्रोक्तामयानघ तस्याःस्वरूपंवक्ष्यामि शृ
णुसर्वभयापहं ४ यच्छ्रुत्वासर्वपापेभ्यो
मुच्यतेनात्रसंशयः रक्तांवरा रक्तवर्णार
क्तसर्वांगभूषणा ५ रक्तायुधारक्तनेत्रा रक्त
केशातिभीषणा रक्ततीक्ष्णनखारक्ता रसना
रक्तदंतिका पतिंनारीवानुरक्ता देवीभक्तंभ
जेज्जनं वसुधेवविशालासा सुमेरुयुगलस्त

नी ७ दीर्घौलंबावतिस्थूलौ तावतीवमनो
हरौ कर्कशावतिकांतौतौ सर्वानंदपयोनि
धी ८ भक्तान्संपाययेद्देवी सर्वपापदुघोस्त
नौ खड्गपात्रशिरःखेटै रलंकृतचतुर्भुजा ९
आख्यातारक्तचामुंडा देवीयोगेश्वरीतिच अन
याव्याप्तमखिलं जगत्स्थावरजंगमं ९ इमांयः
पूजयेद्भक्त्या सव्याप्नोति चराचरं भुक्त्वाभोगा

मू॰ न्यथाकामं देवीसायुज्यमाप्नुयात् ॥ ग्रथी
१॰ तेयश्चमंनित्यं रक्तदंत्यावपुःस्तवं तंसापरिच
२ रेद्देवी पतिंप्रियमिवांगना ॥२ शाकंभरीनी
लवर्णा नीलोत्पलविलोचना गंभीरनाभिस्त्रि
वली विभूषिततनूदरी ॥३ सुकर्कशसमोत्तुं
गवृत्तपीनघनस्तनी मुष्टिशिलीमुखापूर्णांक
मलंकमलालया ॥४ पुष्पपल्लवमूलादि फ

लाढ्यं शाकसंचयं काम्यानंतरसैयुक्तं क्षुत्तृ-
ड्मृत्युजरापहं ५ कार्मुकंचस्फुरत्कांति विभ
र्तिपरमेश्वरी शाकंभरीशताक्षीसा सैवदुर्गा
प्रकीर्तिता ६ उमागौरीसतीचंडी कालिका
साचपार्वती शाकंभरींस्तुवंध्यायन् जपन्सं
पूजयन्नमन् ७ अक्षय्यमश्नुते शीघ्रं मन्नपा
नाम्रतंजलं भीमापिनीलवर्णासा दंष्ट्रादशान

मू॰ भासुरा १८ विशाललोचनानारी वृत्तपीनप
१॰ योधरा चंद्रहासंचडमरुं शिरःपात्रंचविभ्रती
२ १९ एकवीराकालरात्रिः सैवोक्ताकामदास्तुता
3 तेजोमंडलदुर्धर्षा भ्रामरीचित्रकांतिभृत् २॰
चित्रभ्रमरसंकाशा महामारीतिगीयते इत्ये
तामूर्तयोदेव्या व्याख्यातावसुधाधिप २१ ज
गन्मातुश्चंडिकायाः कीर्तिताःकामधेनवः ।

इदंरहस्यंपरमं नवाच्यंकस्यचित्त्वया २२ व्या-
ख्यानंदिव्यमूर्तीना मधीष्वावहितःस्वयं एत
स्यास्त्वंप्रसादेन सर्वमान्योभविष्यसि २३ स
र्वरूपमयीदेवी सर्वंदेवीमयंजगत् अतोहंवि
श्वरूपांत्वां नमामिपरमेश्वरीं २४ इतिमूर्त्तिर
हस्यंसमाप्तम् ॥

ॐ नमो इंद्राक्ष्यै भगवत्यै ॐ अस्य श्री इंद्राक्षी-
स्तोत्रमंत्रस्य पुरंदर ऋषिः अनुष्टुप् छंदः श्री
इंद्राक्षीदेवता क्लींबीजं भुवनेश्वरी शक्तिः भ
वानी कीलकं गायत्री सावित्री सरस्वती कव
चं सकलकामना सिद्ध्यर्थे पाठे विनियोगः ।
ॐ लक्ष्म्यै अंगुष्ठाभ्यां नमः भुवनेश्वर्यै तर्जनी
भ्यां नमः माहेश्वर्यै मध्यमाभ्यां नमः वज्र-

ई॰ हस्तायैअनामिकाभ्यांनमः सहस्रनयनाय
८ कनिष्ठिकाभ्यांनमः इंद्राक्ष्यैभगवत्यै करत
लकरपृष्ठाभ्यांनमः इतिकरन्यासः अथहृद
यादिन्यासः ॐलक्ष्म्यैहृदयायनमः भुवने
श्वर्यैशिरसेस्वाहा माहेश्वर्यैशिखायैवषट् व
ज्रहस्तायैकवचायहुं सहस्रनयनायैनेत्रत्र
यायवौषट् इंद्राक्ष्यैभगवत्यैअस्त्रायफट् ॥ ॥

अथध्यानं इंद्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयां
शुभां वामेवज्रधरां सव्य हस्ते भयवरप्रदां १
सहस्रनेत्रां सूर्याभां नानालंकारभूषितां प्रस
न्नवदनां नित्य मप्सरोगणसेवितां २ श्रीदुर्गां
सौम्यवदनां पाशांकुशधरांपरां त्रैलोक्यमो
हिनीं देवीं भवानीं प्रणमाम्यहं ३ इंद्रउवा
च इंद्राक्षीनामसादेवी देवतासमुदाहृता।

३ गौरीशाकंभरीदेवी दुर्गानाम्नेतिविश्रुता ४
२ कात्यायनीमहादेवी चंडघंटामहातपाः सा
2 वित्रीसाचगायत्री ब्रह्माणीब्रह्मवादिनी ५
नारायणीभद्रकाली रुद्राणीकृष्णपिंगला ।
अग्निज्वालारौद्रमुखी कालरात्रीतपस्विनी ६
मेघश्यामासहस्राक्षी विकटांगीजलोदरी
महोदरीमुक्तकेशी घोररूपामहाबला ७

आनंदाभद्रजानंदा रोगहर्त्रीशिवप्रिया शिवदू
तीकरालीच प्रत्यक्षपरमेश्वरी ८ इंद्राणीचेंद्र
रूपाच इंद्रशक्तिःपरायणा महिषासुरसंहर्त्री
च चामुंडागर्भदेवता ९ वाराहीनारसिंहीच भी
माभैरवनादिनी श्रुतिःस्मृतिर्धृतिर्मेधा विद्या
लक्ष्मीसरस्वती आनंदाविजयापूर्णामानस्तो
कापराजिता भवानीपार्वतीदुर्गा हैमवत्यं

विकाशिवा एतैर्नामपदैर्दिव्यैः स्तुता शाक्ते
णधीमता आयुरारोग्यमैश्वर्यं सुखसंपत्ति
कारकं क्षयापस्मारकुष्ठादि तापज्वरनिवार
णं शतमावर्तयेद्यस्तु मुच्यतेव्याधिवंधना
त् १२ आवर्तयेत्सहस्रेण लभतेवांछितंफ
लं राजावश्यमवाप्नोति सत्यमेवनसंशयः
१५ लक्ष्यमेकंजपेद्यस्तु साक्षाद्देवीभविष्यति

त्रिकालंपठतेनित्यं धनंधान्यंचसंपदः (पुत्र
पौत्राद्रि)
रात्रेपठेन्नित्यं मुच्यतेपापबंधनात् इंद्रस्तो
त्रमिदंपुण्यं जपेत्तुफलवर्धनं विनाशायाति-
रोगाणामपमृत्युहरायच राज्यार्थीलभतेराज्यं
धनार्थीविपुलंधनं इच्छाकामंतुकामार्थी ध
र्मार्थीधर्ममक्षयं विद्यार्थीलभतेविद्यां मो
क्षार्थीपरमंपदं इंद्रेणाकथितंस्तोत्रं सत्यमे-

इं. वनसंश्रयः इतिश्रीइंद्राक्षीस्तोत्रंसमाप्तः शुभ
४ मस्तु ॥ संवत् १९५५ आश्विनप्र० २२ लिपिकृ
५ तं पण्डितकुञ्जलालेन जम्बूपत्तने शुभम्
पुस्तकमिदंश्रीराजा रामसिंहजीका ॥ छ ॥

नं० ५६७-६-घ

श्रीदुर्गासप्तशती

पत्राणि १७५

१७७

लिपिक: कुंजलाल पण्डित: संवत् १९५५